# ॥ श्री बालमुकुन्द स्तोत्रं ॥

आलोक्य मातुर्मुखमादरेण स्तनं पिबन्तं सरसीरुहाननं ।
सुपीवरं देवमनन्तरूपं बालं मुकुन्दं मनसा स्मरामि ॥ १ ॥

यमानुजायां स्थिथकालियस्य घणाग्ररङ्गेकृतताण्डवं तं ।
प्रेयस्तमं तं शरदिन्दुहासं बालं मुकुन्दं मनसा स्मरामि ॥ २ ॥

इन्दीवरश्यामल कोमलाङ्गमिन्द्रादि देवार्चित पादपद्मं ।
सन्तानकल्पद्रुममाश्रितानां बालं मुकुन्दं मनसा स्मरामि ॥ ३ ॥

उलूखले बद्धमुदारवीर्यमत्युग्रयुग्मार्जुनभङ्गलीलं ।
उत्फुल्लपद्मायतचारुनेत्रं बालं मुकुन्दं मनसा स्मरामि ॥ ४ ॥

संहृत्य लोकान् वटपत्रशायिनं शयानमाद्यं तमनन्तरूपं ।
सर्वेश्वरं सर्वहितावतारं बालं मुकुन्दं मनसा स्मरामि ॥ ५ ॥

करारविन्देन पदारविन्दं मुखारविन्दे विनिवेशयन्तं ।
वटस्य पत्रस्य पुटे शयानं बालं मुकुन्दं मनसा स्मरामि ॥ ६ ॥

चित्ते मुकुन्दो वदने मुकुन्दः श्रोत्रे मुकुन्दो नयने मुकुन्दः ।
येशां च सर्वत्र गतिर्मुकुन्दो मुकुन्ददेवान्न परं हि किन्चित् ॥ ७ ॥

तस्मात् सदा सर्वहिताप्तये मुदा बालं मुकुन्दं शरणं प्रपद्ये ।
एवं मुकुन्दाष्टकमादरेण सकृत् पठेत् तस्य भवेद्धि मुक्तिः ॥ ८ ॥

ये मुकुन्दस्तुतिं भक्त्या प्रातःकाले विशेशतः ।
पठन्ति नियतात्मानस्तेशां सिद्धिर्भविश्यति ॥ ९ ॥

॥ इति श्रीवराहपुराणे श्रीबालमुकुन्दस्तोत्रं ॥